**संस्कृतवार्ता:**

**दिनाङ्क :-21.09.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्रि-अमरिकायात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य अनेकेषु उपवेशनेषु कार्यक्रमेषु च भागग्रहणाय अमेरिका देशस्य त्रिदिवसीययात्रार्थं प्रवृत्तो वर्तते। श्रमोदी यात्राया: प्रथमे चरणे डेलावेयरस्य विलमिंग्टन इत्यत्र आयोक्ष्यमाणे चतुर्थ-क्वाड-नेतृणां शिखरसम्मेलने भागं भजिष्यति। एतस्मिन् शिखरसम्मेलने नैका: जलवायुपरिवर्तन-सदृशा: समस्या: समादाय चर्चां सुनिश्चिता: सन्ति। अत्रावधौ श्रीमोदी क्वाडसमूहस्य अन्यै: नेतृभि: सह अमरिकायाश्च राष्ट्रपतिना जो बाइडेन-इत्यमुना साकमपि संवादं समाचरिष्यति। तदनु प्रधानमन्त्री श्रीमोदी द्वाविंशे दिनाङ्के न्यूयॉर्कनगरे निवसद्भि: भारतीयप्रवासिभिस्साकं मेलनं करिष्यति। स्वीययात्राया: अन्तिमे चरणे श्रीमोदी न्यूयॉर्कनगरैव संयुक्तराष्ट्रमहासभायां 'भविष्यस्य शिखरसम्मेलनानि' इति विषयमवलम्ब्य सम्बोधनं स्वीयं प्रकटयिष्यति।

**दिल्ली-मुख्यमन्त्री**

आमआदमीपार्टीतिदलनेत्री आतिशी अद्य दिल्ल्या: मुख्यमन्त्रिपदाय शपथवचनं स्वीकरिष्यति। शपथवचनसमारोहोऽयं राजनिवासे निर्धारितो वर्तते यत्र उपराज्यपाल: वी.के. सक्सेना इत्येष: आतिशीइत्यस्यै तस्या: च मन्त्रिपरिषदे शपथवचनं प्रदास्यति। राष्ट्रपति: द्रौपदीमुर्मु: आतिशीं दिल्ल्या: मुख्यमन्त्रीपदाय नियोजितवती। अत्रावसरे आतिशीं समेत्य मन्त्रिपरिषद: गोपालराय: कैलाशगहलोत: सौरभभारद्वाज: इमरानहुसैन: मुकेश अहलावत: च शपथवचनं स्वीकरिष्यन्ति।

**श्रीलङ्का-निर्वाचनम्**

श्रीलङ्कादेशे जातस्य द्वाविंशत्यधिक-द्विसहस्रतमवर्षस्य आर्थिक-सङ्कटस्य अनन्तरं मतदातार: अद्य नवीनाय राष्ट्रपतये निर्वाचनं करिष्यन्ति। अवधेयं वर्तते आहत्य अष्टत्रिंशत् प्रत्याशिन: नैर्वाचनिकरणे विराजन्ते। परञ्च मुख्यतया सङ्घर्ष: वर्तमानस्य राष्ट्रपते: रानिलविक्रमसिंघे इत्यस्य प्रतिपक्षस्य च नेतु: सजित प्रेमदासाइत्यस्य च मध्ये विद्यते।

**भारत-नेपाल-रेलयात्रा**

केन्द्रीयरेलमन्त्री अश्विनी वैष्णव: ह्य: नवदिल्ल्या: हजरत-निज़ामुद्दीन-रेल-स्थानकात् भारत-नेपाल-मैत्री-यात्रा-पर्यटनरेलयानाय हरितध्वजं प्रदर्शितवान्। अनेन रेलयानेन पर्यटका: भारत-नेपाल देशयो: सीम्नि स्थितानां धार्मिकस्थलानां दर्शनं कर्तुं शक्नुवन्ति। दशदिवसानाम् एतस्यां यात्रायां यात्रिण: भारते अयोध्या-वाराणसी-सीतामढीस्थलानां नेपाले च जनकपुर-काठमाण्डू-पोखरा-इत्यादीनां धार्मिक स्थलानां भ्रमणं दर्शनञ्च करिष्यन्ति।

**प्रधानमन्त्री-वर्धा**

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् विश्वकर्मायोजना भारतस्य विकासाय सहस्रवर्षपुरातन-कौशलानाम् उपयोगाय च दिङ्निर्देशः अस्ति। महाराष्ट्रस्य वर्धायां पीएम-विश्वकर्मायोजनायाः वार्षिकोत्सव-कार्यक्रमं सम्बोधयन् श्रीमोदी पीएम-विश्वकर्मायोजनायाः लाभं गृहीत्वा कार्मिकेभ्यः उद्यमिनः व्यापारिणः च भवितुम् आह्वानं कृतवान्।

**अमित शाह-परिवर्तन यात्रा**

केन्द्रीय गृहमंत्री अमित शाह: ह्य: झारखण्डराज्यस्य साहेबगंज जनपदस्य भोगनाडीह-स्थलात् झारखण्ड-भाजपादलस्य संथालपरगना संभागाय परिवर्तन यात्रायाः शुभारम्भं कृतवान्। एकस्मिन् उद्याने जनसभां सम्बोधयन् श्रीशाहः अवदत् यत् परिवर्तनयात्रायाः अनन्तरं राज्ये निर्वाचनप्रचारः आरब्धः अस्ति।

**केन्द्रीयगृहमन्त्री अमितशाहः**

केन्द्रीयगृहमन्त्री अमितशाहः प्रतिपादितवान् यत् सर्वकारेण निर्णयः स्वीकृतः अस्ति यत् षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य मार्च-मासात् पूर्वं नक्सलवादात् नक्सलवादस्य विचारेभ्य च देशः मुक्तो भविष्यति। श्रीशाहः ह्य: नवदिल्ल्यां स्वीय निवासस्थाने छत्तीसगढ़े नक्सलहिंसायाः प्रायः पञ्च पञ्चाशत् पीडितैः सह संवादं कुर्वन् आसीत्।